## ॐ नमः शिवाय

## श्रीमत्पद्मपादाचार्यविरचितो मन्त्रराजप्रकाशः

त्यागो हि नमसो वाच्य आनन्दः प्रकृतेस्तथा ।
फलं प्रत्ययवाच्यं स्यात् त्याज्यं पत्रफलादिकम् ।।1।।

त्यजामीदमिदं सर्वं चतुर्णामिह सिद्धये ।
अथवा नमसो वाच्यः प्रणामो दैन्यलब्धये ।।2।।

दैन्यं सेवा तथा ज्ञप्तिः सिद्धिः सर्वस्य वस्तुनः ।
नमामि देवदेवेशं सकामोऽकाम एव वा ।।3।।

नञा निषिध्यते भाव – विकृतिर्जगदात्मनः ।
मसनं देवदेवेश नेह नानाऽस्ति शब्दतः ।।4।।

अयेति गमयेत्यर्थे तस्माच्छुद्धोऽस्मि नित्यशः ।
प्रणामो देहगेहादे – रभिमानस्य नाशनम् ।।5।।

शिवो ब्रह्मादिरूपस्स्याच्छक्तिभिस्तिसृभिस्सह ।
अथवा तुर्यमेव स्यान् निर्गुणम्ब्रह्मतत्परम् ।।6।।

नमसो नमने शक्ति र्नमनं ध्यानमेव च ।
ङेऽन्तात्तादात्म्यसम्बन्धः कथ्यते प्रत्यगात्मनोः ।।7।।

अहं शिवः शिवोऽहं च मन्ये वेदान्तनिष्ठया ।
इत्येवं नम इत्युक्तं वेदैः शास्त्रैश्च सर्वशः ।।8।।

अथवा दास एवाहं अहं दास इतीरणम् ।
इत्येव नम इत्युक्तं वेदैः शास्त्रैश्च सर्वशः ।।9।।

अथवेदमिदं सर्वं त्यजामि परमाप्तये ।
अर्थं धर्मं च कामं च वांछंश्च जगदीश्वरम् ।।10।।

एतन्मन्त्रार्थतत्त्वज्ञैः वेदवेदान्ततत्परैः ।
निर्णीतं तत्त्वगर्भं यद् विज्ञेयं मुक्तिलब्धये ।।11।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

अथवा मुक्तिलाभाय ध्येयं तत्त्वं विवेकतः ।
भिन्नं बुद्ध्वा हृदा देवं मन्त्रेणेशं जगद्गुरुम् ।।12।।

नमेरचि नमः प्रोक्तो जन्ता स्याज्जगदीश्वरे ।
तस्माद्दासोऽहमित्येवं मत्त्वा मां प्रापयात्मनि ।।13।।

अस्मिन्छेते जगत्सर्वं तन्मयं शब्दगामि यत् ।
तद् वानाच्छिव इत्युक्तं कारणं ब्रह्म तत्पराः ।।14।।

न मा यस्यास्ति लक्ष्मीश सोऽहं देवो न संशयः ।
तस्मान्मे प्रापयेहैव लक्ष्मीं विद्यां सनातनीम् ।।15।।

यसमादानन्दरूपस्त्वं देवैर्वेदैर्निगद्यसे ।
तस्मान्मे देहि योगीश भद्रं ज्ञानं सुभावनम् ।।16।।

यस्मात्त्वं नेति नेतीति नञर्थं मासि वेदजम् ।
तस्मान्नमोऽसि भद्रं मे यतो जातोऽनमो नमः ।।17।।

शिवं शिवमथाप्राप्तः शिवायेति निगद्यसे ।
शिवाय मे तथा प्राप्त्या शिवायेति निगद्यसे ।।18।।

शिवां यातो महाभद्र नमोऽहं मायया ध्रुवं ।
ततो नमाय मह्यं मः शिवाय कुरु सर्वथा ।।19।।

शिवमेषि यतो ज्ञप्त्या शिवायस्त्वं प्रपठ्यसे ।
न ते माया यतो ज्ञप्त्या नमो वेदैः प्रपठ्यते ।।20।।

नमोऽहं च शिवायोऽहं नमो मह्यं नमो नमः ।
नमो नमाय शुद्धाय मंगलाय नमो नमः ।।21।।

नमो नमसनं शम्भो निराकाराय ते नमः ।
निर्गुणं निष्क्रियं शान्तं इत्याद्याश्श्रुतयो जगुः ।।22।।

नमो ब्रह्म निराकारं शिवायं शिव सर्वदा ।
अतोऽहं च न मा भद्र शिवायोऽहं न संशयः ।।23।।

।। इति श्रीमत्पद्मपादाचार्यविरचितो मन्त्रराजप्रकाशः ।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM